श्री विष्णु सहस्रनाम स्तोत्रम्

Shri Vishnu Sahasranamam

Source: Sri Vani Vilas Sanskrit volume 13 — historical scan, catalogue date 1910. Also compared: Controlling PDF — full hymn and chapter colophon within PDF pages 15–181; Internet Archive catalogue metadata — publication date and file identity.

युधिष्ठिर के प्रश्न

SHLOKA 1

श्रीवैशम्पायन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥१॥

śrutvā dharmānaśeṣeṇa pāvanāni ca sarvaśaḥ |
yudhiṣṭhiraḥ śāntanavaṃ punarevābhyabhāṣata ||1||

SHLOKA 2

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥२॥

kimekaṃ daivataṃ loke kiṃ vāpyekaṃ parāyaṇam |
stuvantaḥ kaṃ kamarcantaḥ prāpnuyurmānavāḥ śubham ||2||

SHLOKA 3

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥३॥

ko dharmaḥ sarvadharmāṇāṃ bhavataḥ paramo mataḥ |
kiṃ japanmucyate janturjanmasaṃsārabandhanāt ||3||

भीष्म का उत्तर

SHLOKA 4

श्रीभीष्म उवाच

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥४॥

jagatprabhuṃ devadevamanantaṃ puruṣottamam |
stuvannāmasahasreṇa puruṣaḥ satatotthitaḥ ||4||

SHLOKA 5

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥५॥

tameva cārcayannityaṃ bhaktyā puruṣamavyayam |
dhyāyanstuvannamasyaṃśca yajamānastameva ca ||5||

SHLOKA 6

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥६॥

anādinidhanaṃ viṣṇuṃ sarvalokamaheśvaram |
lokādhyakṣaṃ stuvannityaṃ sarvaduḥkhātigo bhavet ||6||

SHLOKA 7

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥७॥

brahmaṇyaṃ sarvadharmajñaṃ lokānāṃ kīrtivardhanam |
lokanāthaṃ mahadbhūtaṃ sarvabhūtabhavodbhavam ||7||

SHLOKA 8

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥८॥

eṣa me sarvadharmāṇāṃ dharmo'dhikatamo mataḥ |
yadbhaktyā puṇḍarīkākṣaṃ stavairarcennaraḥ sadā ||8||

SHLOKA 9

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥९॥

paramaṃ yo mahattejaḥ paramaṃ yo mahattapaḥ |
paramaṃ yo mahadbrahma paramaṃ yaḥ parāyaṇam ||9||

SHLOKA 10

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥१०॥

pavitrāṇāṃ pavitraṃ yo maṅgalānāṃ ca maṅgalam |
daivataṃ devatānāṃ ca bhūtānāṃ yo'vyayaḥ pitā ||10||

SHLOKA 11

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥११॥

yataḥ sarvāṇi bhūtāni bhavantyādiyugāgame |
yasmiṃśca pralayaṃ yānti punareva yugakṣaye ||11||

SHLOKA 12

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥१२॥

tasya lokapradhānasya jagannāthasya bhūpate |
viṣṇornāmasahasraṃ me śṛṇu pāpabhayāpaham ||12||

SHLOKA 13

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥१३॥

yāni nāmāni gauṇāni vikhyātāni mahātmanaḥ |
ṛṣibhiḥ parigītāni tāni vakṣyāmi bhūtaye ||13||

विश्व, विष्णु और सृष्टि के प्रभु

SHLOKA 14

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥१४॥

viśvaṃ viṣṇurvaṣaṭkāro bhūtabhavyabhavatprabhuḥ |
bhūtakṛdbhūtabhṛdbhāvo bhūtātmā bhūtabhāvanaḥ ||14||

SHLOKA 15

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥१५॥

pūtātmā paramātmā ca muktānāṃ paramā gatiḥ |
avyayaḥ puruṣaḥ sākṣī kṣetrajño'kṣara eva ca ||15||

SHLOKA 16

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥१६॥

yogo yogavidāṃ netā pradhānapuruṣeśvaraḥ |
nārasiṃhavapuḥ śrīmānkeśavaḥ puruṣottamaḥ ||16||

SHLOKA 17

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥१७॥

sarvaḥ śarvaḥ śivaḥ sthāṇurbhūtādirnidhiravyayaḥ |
sambhavo bhāvano bhartā prabhavaḥ prabhurīśvaraḥ ||17||

SHLOKA 18

स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥१८॥

svayambhūḥ śambhurādityaḥ puṣkarākṣo mahāsvanaḥ |
anādinidhano dhātā vidhātā dhāturuttamaḥ ||18||

SHLOKA 19

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥१९॥

aprameyo hṛṣīkeśaḥ padmanābho'maraprabhuḥ |
viśvakarmā manustvaṣṭā sthaviṣṭhaḥ sthaviro dhruvaḥ ||19||

SHLOKA 20

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥२०॥

agrāhyaḥ śāśvataḥ kṛṣṇo lohitākṣaḥ pratardanaḥ |
prabhūtastrikakubdhāma pavitraṃ maṅgalaṃ param ||20||

SHLOKA 21

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥२१॥

īśānaḥ prāṇadaḥ prāṇo jyeṣṭhaḥ śreṣṭhaḥ prajāpatiḥ |
hiraṇyagarbho bhūgarbho mādhavo madhusūdanaḥ ||21||

SHLOKA 22

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥२२॥

īśvaro vikramī dhanvī medhāvī vikramaḥ kramaḥ |
anuttamo durādharṣaḥ kṛtajñaḥ kṛtirātmavān ||22||

SHLOKA 23

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥२३॥

sureśaḥ śaraṇaṃ śarma viśvaretāḥ prajābhavaḥ |
ahaḥ saṃvatsaro vyālaḥ pratyayaḥ sarvadarśanaḥ ||23||

SHLOKA 24

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥२४॥

ajaḥ sarveśvaraḥ siddhaḥ siddhiḥ sarvādiracyutaḥ |
vṛṣākapirameyātmā sarvayogaviniḥsṛtaḥ ||24||

SHLOKA 25

वसुर्वसुमनाः सत्यः समात्मासंमितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥२५॥

vasurvasumanāḥ satyaḥ samātmāsaṃmitaḥ samaḥ |
amoghaḥ puṇḍarīkākṣo vṛṣakarmā vṛṣākṛtiḥ ||25||

SHLOKA 26

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ॥२६॥

rudro bahuśirā babhrurviśvayoniḥ śuciśravāḥ |
amṛtaḥ śāśvatasthāṇurvarāroho mahātapāḥ ||26||

SHLOKA 27

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥२७॥

sarvagaḥ sarvavidbhānurviṣvakseno janārdanaḥ |
vedo vedavidavyaṅgo vedāṅgo vedavitkaviḥ ||27||

SHLOKA 28

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥२८॥

lokādhyakṣaḥ surādhyakṣo dharmādhyakṣaḥ kṛtākṛtaḥ |
caturātmā caturvyūhaścaturdaṃṣṭraścaturbhujaḥ ||28||

SHLOKA 29

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥२९॥

bhrājiṣṇurbhojanaṃ bhoktā sahiṣṇurjagadādijaḥ |
anagho vijayo jetā viśvayoniḥ punarvasuḥ ||29||

SHLOKA 30

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमो यमः ॥३०॥

upendro vāmanaḥ prāṃśuramoghaḥ śucirūrjitaḥ |
atīndraḥ saṅgrahaḥ sargo dhṛtātmā niyamo yamaḥ ||30||

SHLOKA 31

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥३१॥

vedyo vaidyaḥ sadāyogī vīrahā mādhavo madhuḥ |
atīndriyo mahāmāyo mahotsāho mahābalaḥ ||31||

SHLOKA 32

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥३२॥

mahābuddhirmahāvīryo mahāśaktirmahādyutiḥ |
anirdeśyavapuḥ śrīmānameyātmā mahādridhṛk ||32||

SHLOKA 33

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥३३॥

maheṣvāso mahībhartā śrīnivāsaḥ satāṃ gatiḥ |
aniruddhaḥ surānando govindo govidāṃ patiḥ ||33||

हंस और सुपर्ण से दामोदर तक

SHLOKA 34

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥३४॥

marīcirdamano haṃsaḥ suparṇo bhujagottamaḥ |
hiraṇyanābhaḥ sutapāḥ padmanābhaḥ prajāpatiḥ ||34||

SHLOKA 35

अमृत्युः सर्वदृक्सिंहः सन्धाता सन्धिमान्स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥३५॥

amṛtyuḥ sarvadṛksiṃhaḥ sandhātā sandhimānsthiraḥ |
ajo durmarṣaṇaḥ śāstā viśrutātmā surārihā ||35||

SHLOKA 36

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥३६॥

gururgurutamo dhāma satyaḥ satyaparākramaḥ |
nimiṣo'nimiṣaḥ sragvī vācaspatirudāradhīḥ ||36||

SHLOKA 37

अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥३७॥

agraṇīrgrāmaṇīḥ śrīmānnyāyo netā samīraṇaḥ |
sahasramūrdhā viśvātmā sahasrākṣaḥ sahasrapāt ||37||

SHLOKA 38

आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अहःसंवर्तको वह्निरनिलो धरणीधरः ॥३८॥

āvartano nivṛttātmā saṃvṛtaḥ sampramardanaḥ |
ahaḥsaṃvartako vahniranilo dharaṇīdharaḥ ||38||

SHLOKA 39

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥३९॥

suprasādaḥ prasannātmā viśvadhṛgviśvabhugvibhuḥ |
satkartā satkṛtaḥ sādhurjahnurnārāyaṇo naraḥ ||39||

SHLOKA 40

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥४०॥

asaṃkhyeyo'prameyātmā viśiṣṭaḥ śiṣṭakṛcchuciḥ |
siddhārthaḥ siddhasaṅkalpaḥ siddhidaḥ siddhisādhanaḥ ||40||

SHLOKA 41

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥४१॥

vṛṣāhī vṛṣabho viṣṇurvṛṣaparvā vṛṣodaraḥ |
vardhano vardhamānaśca viviktaḥ śrutisāgaraḥ ||41||

SHLOKA 42

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥४२॥

subhujo durdharo vāgmī mahendro vasudo vasuḥ |
naikarūpo bṛhadrūpaḥ śipiviṣṭaḥ prakāśanaḥ ||42||

SHLOKA 43

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥४३॥

ojastejodyutidharaḥ prakāśātmā pratāpanaḥ |
ṛddhaḥ spaṣṭākṣaro mantraścandrāṃśurbhāskaradyutiḥ ||43||

SHLOKA 44

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥४४॥

amṛtāṃśūdbhavo bhānuḥ śaśabinduḥ sureśvaraḥ |
auṣadhaṃ jagataḥ setuḥ satyadharmaparākramaḥ ||44||

SHLOKA 45

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥४५॥

bhūtabhavyabhavannāthaḥ pavanaḥ pāvano'nalaḥ |
kāmahā kāmakṛtkāntaḥ kāmaḥ kāmapradaḥ prabhuḥ ||45||

SHLOKA 46

युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित् ॥४६॥

yugādikṛdyugāvarto naikamāyo mahāśanaḥ |
adṛśyo vyaktarūpaśca sahasrajidanantajit ||46||

SHLOKA 47

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥४७॥

iṣṭo'viśiṣṭaḥ śiṣṭeṣṭaḥ śikhaṇḍī nahuṣo vṛṣaḥ |
krodhahā krodhakṛtkartā viśvabāhurmahīdharaḥ ||47||

SHLOKA 48

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥४८॥

acyutaḥ prathitaḥ prāṇaḥ prāṇado vāsavānujaḥ |
apāṃ nidhiradhiṣṭhānamapramattaḥ pratiṣṭhitaḥ ||48||

SHLOKA 49

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥४९॥

skandaḥ skandadharo dhuryo varado vāyuvāhanaḥ |
vāsudevo bṛhadbhānurādidevaḥ purandaraḥ ||49||

SHLOKA 50

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥५०॥

aśokastāraṇastāraḥ śūraḥ śaurirjaneśvaraḥ |
anukūlaḥ śatāvartaḥ padmī padmanibhekṣaṇaḥ ||50||

SHLOKA 51

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥५१॥

padmanābho'ravindākṣaḥ padmagarbhaḥ śarīrabhṛt |
maharddhirṛddho vṛddhātmā mahākṣo garuḍadhvajaḥ ||51||

SHLOKA 52

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ॥५२॥

atulaḥ śarabho bhīmaḥ samayajño havirhariḥ |
sarvalakṣaṇalakṣaṇyo lakṣmīvānsamitiñjayaḥ ||52||

SHLOKA 53

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥५३॥

vikṣaro rohito mārgo heturdāmodaraḥ sahaḥ |
mahīdharo mahābhāgo vegavānamitāśanaḥ ||53||

राम, वैकुण्ठ और सङ्कर्षण

SHLOKA 54

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥५४॥

udbhavaḥ kṣobhaṇo devaḥ śrīgarbhaḥ parameśvaraḥ |
karaṇaṃ kāraṇaṃ kartā vikartā gahano guhaḥ ||54||

SHLOKA 55

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥५५॥

vyavasāyo vyavasthānaḥ saṃsthānaḥ sthānado dhruvaḥ |
pararddhiḥ paramaspaṣṭastuṣṭaḥ puṣṭaḥ śubhekṣaṇaḥ ||55||

SHLOKA 56

रामो विरामो विरतो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥५६॥

rāmo virāmo virato mārgo neyo nayo'nayaḥ |
vīraḥ śaktimatāṃ śreṣṭho dharmo dharmaviduttamaḥ ||56||

SHLOKA 57

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥५७॥

vaikuṇṭhaḥ puruṣaḥ prāṇaḥ prāṇadaḥ praṇavaḥ pṛthuḥ |
hiraṇyagarbhaḥ śatrughno vyāpto vāyuradhokṣajaḥ ||57||

SHLOKA 58

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥५८॥

ṛtuḥ sudarśanaḥ kālaḥ parameṣṭhī parigrahaḥ |
ugraḥ saṃvatsaro dakṣo viśrāmo viśvadakṣiṇaḥ ||58||

SHLOKA 59

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥५९॥

vistāraḥ sthāvarasthāṇuḥ pramāṇaṃ bījamavyayam |
artho'nartho mahākośo mahābhogo mahādhanaḥ ||59||

SHLOKA 60

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥६०॥

anirviṇṇaḥ sthaviṣṭho'bhūrdharmayūpo mahāmakhaḥ |
nakṣatranemirnakṣatrī kṣamaḥ kṣāmaḥ samīhanaḥ ||60||

SHLOKA 61

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥६१॥

yajña ijyo mahejyaśca kratuḥ satraṃ satāṃ gatiḥ |
sarvadarśī vimuktātmā sarvajño jñānamuttamam ||61||

SHLOKA 62

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥६२॥

suvrataḥ sumukhaḥ sūkṣmaḥ sughoṣaḥ sukhadaḥ suhṛt |
manoharo jitakrodho vīrabāhurvidāraṇaḥ ||62||

SHLOKA 63

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥६३॥

svāpanaḥ svavaśo vyāpī naikātmā naikakarmakṛt |
vatsaro vatsalo vatsī ratnagarbho dhaneśvaraḥ ||63||

SHLOKA 64

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥६४॥

dharmagubdharmakṛddharmī sadasatkṣaramakṣaram |
avijñātā sahasrāṃśurvidhātā kṛtalakṣaṇaḥ ||64||

SHLOKA 65

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥६५॥

gabhastinemiḥ sattvasthaḥ siṃho bhūtamaheśvaraḥ |
ādidevo mahādevo deveśo devabhṛdguruḥ ||65||

SHLOKA 66

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥६६॥

uttaro gopatirgoptā jñānagamyaḥ purātanaḥ |
śarīrabhūtabhṛdbhoktā kapīndro bhūridakṣiṇaḥ ||66||

SHLOKA 67

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥६७॥

somapo'mṛtapaḥ somaḥ purujitpurusattamaḥ |
vinayo jayaḥ satyasandho dāśārhaḥ sātvatāṃ patiḥ ||67||

SHLOKA 68

जीवो विनयितासाक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥६८॥

jīvo vinayitāsākṣī mukundo'mitavikramaḥ |
ambhonidhiranantātmā mahodadhiśayo'ntakaḥ ||68||

SHLOKA 69

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनोऽनन्दः सत्यधर्मा त्रिविक्रमः ॥६९॥

ajo mahārhaḥ svābhāvyo jitāmitraḥ pramodanaḥ |
ānando nandano'nandaḥ satyadharmā trivikramaḥ ||69||

SHLOKA 70

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥७०॥

maharṣiḥ kapilācāryaḥ kṛtajño medinīpatiḥ |
tripadastridaśādhyakṣo mahāśṛṅgaḥ kṛtāntakṛt ||70||

SHLOKA 71

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥७१॥

mahāvarāho govindaḥ suṣeṇaḥ kanakāṅgadī |
guhyo gabhīro gahano guptaścakragadādharaḥ ||71||

SHLOKA 72

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥७२॥

vedhāḥ svāṅgo'jitaḥ kṛṣṇo dṛḍhaḥ saṅkarṣaṇo'cyutaḥ |
varuṇo vāruṇo vṛkṣaḥ puṣkarākṣo mahāmanāḥ ||72||

SHLOKA 73

भगवान्भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥७३॥

bhagavānbhagahānandī vanamālī halāyudhaḥ |
ādityo jyotirādityaḥ sahiṣṇurgatisattamaḥ ||73||

श्री, ब्रह्म और वासुदेव

SHLOKA 74

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवःस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥७४॥

sudhanvā khaṇḍaparaśurdāruṇo draviṇapradaḥ |
divaḥspṛksarvadṛgvyāso vācaspatirayonijaḥ ||74||

SHLOKA 75

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥७५॥

trisāmā sāmagaḥ sāma nirvāṇaṃ bheṣajaṃ bhiṣak |
saṃnyāsakṛcchamaḥ śānto niṣṭhā śāntiḥ parāyaṇam ||75||

SHLOKA 76

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥७६॥

śubhāṅgaḥ śāntidaḥ sraṣṭā kumudaḥ kuvaleśayaḥ |
gohito gopatirgoptā vṛṣabhākṣo vṛṣapriyaḥ ||76||

SHLOKA 77

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ॥७७॥

anivartī nivṛttātmā saṃkṣeptā kṣemakṛcchivaḥ |
śrīvatsavakṣāḥ śrīvāsaḥ śrīpatiḥ śrīmatāṃ varaḥ ||77||

SHLOKA 78

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥७८॥

śrīdaḥ śrīśaḥ śrīnivāsaḥ śrīnidhiḥ śrīvibhāvanaḥ |
śrīdharaḥ śrīkaraḥ śreyaḥ śrīmāṁllokatrayāśrayaḥ ||78||

SHLOKA 79

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्माविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥७९॥

svakṣaḥ svaṅgaḥ śatānando nandirjyotirgaṇeśvaraḥ |
vijitātmāvidheyātmā satkīrtiśchinnasaṃśayaḥ ||79||

SHLOKA 80

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥८०॥

udīrṇaḥ sarvataścakṣuranīśaḥ śāśvatasthiraḥ |
bhūśayo bhūṣaṇo bhūtirviśokaḥ śokanāśanaḥ ||80||

SHLOKA 81

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥८१॥

arciṣmānarcitaḥ kumbho viśuddhātmā viśodhanaḥ |
aniruddho'pratirathaḥ pradyumno'mitavikramaḥ ||81||

SHLOKA 82

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥८२॥

kālaneminihā vīraḥ śauriḥ śūrajaneśvaraḥ |
trilokātmā trilokeśaḥ keśavaḥ keśihā hariḥ ||82||

SHLOKA 83

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥८३॥

kāmadevaḥ kāmapālaḥ kāmī kāntaḥ kṛtāgamaḥ |
anirdeśyavapurviṣṇurvīro'nanto dhanañjayaḥ ||83||

SHLOKA 84

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥८४॥

brahmaṇyo brahmakṛdbrahmā brahma brahmavivardhanaḥ |
brahmavidbrāhmaṇo brahmī brahmajño brāhmaṇapriyaḥ ||84||

SHLOKA 85

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥८५॥

mahākramo mahākarmā mahātejā mahoragaḥ |
mahākraturmahāyajvā mahāyajño mahāhaviḥ ||85||

SHLOKA 86

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥८६॥

stavyaḥ stavapriyaḥ stotraṃ stutiḥ stotā raṇapriyaḥ |
pūrṇaḥ pūrayitā puṇyaḥ puṇyakīrtiranāmayaḥ ||86||

SHLOKA 87

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥८७॥

manojavastīrthakaro vasuretā vasupradaḥ |
vasuprado vāsudevo vasurvasumanā haviḥ ||87||

SHLOKA 88

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥८८॥

sadgatiḥ satkṛtiḥ sattā sadbhūtiḥ satparāyaṇaḥ |
śūraseno yaduśreṣṭhaḥ sannivāsaḥ suyāmunaḥ ||88||

SHLOKA 89

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥८९॥

bhūtāvāso vāsudevaḥ sarvāsunilayo'nalaḥ |
darpahā darpado dṛpto durdharo'thāparājitaḥ ||89||

SHLOKA 90

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥९०॥

viśvamūrtirmahāmūrtirdīptamūrtiramūrtimān |
anekamūrtiravyaktaḥ śatamūrtiḥ śatānanaḥ ||90||

SHLOKA 91

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥९१॥

eko naikaḥ savaḥ kaḥ kiṃ yattatpadamanuttamam |
lokabandhurlokanātho mādhavo bhaktavatsalaḥ ||91||

SHLOKA 92

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥९२॥

suvarṇavarṇo hemāṅgo varāṅgaścandanāṅgadī |
vīrahā viṣamaḥ śūnyo ghṛtāśīracalaścalaḥ ||92||

SHLOKA 93

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥९३॥

amānī mānado mānyo lokasvāmī trilokadhṛk |
sumedhā medhajo dhanyaḥ satyamedhā dharādharaḥ ||93||

चतुर्व्यूह, दुर्जय और विपरीत गुण

SHLOKA 94

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥९४॥

tejovṛṣo dyutidharaḥ sarvaśastrabhṛtāṃ varaḥ |
pragraho nigraho vyagro naikaśṛṅgo gadāgrajaḥ ||94||

SHLOKA 95

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥९५॥

caturmūrtiścaturbāhuścaturvyūhaścaturgatiḥ |
caturātmā caturbhāvaścaturvedavidekapāt ||95||

SHLOKA 96

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥९६॥

samāvarto'nivṛttātmā durjayo duratikramaḥ |
durlabho durgamo durgo durāvāso durārihā ||96||

SHLOKA 97

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥९७॥

śubhāṅgo lokasāraṅgaḥ sutantustantuvardhanaḥ |
indrakarmā mahākarmā kṛtakarmā kṛtāgamaḥ ||97||

SHLOKA 98

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥९८॥

udbhavaḥ sundaraḥ sundo ratnanābhaḥ sulocanaḥ |
arko vājasanaḥ śṛṅgī jayantaḥ sarvavijjayī ||98||

SHLOKA 99

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥९९॥

suvarṇabindurakṣobhyaḥ sarvavāgīśvareśvaraḥ |
mahāhrado mahāgarto mahābhūto mahānidhiḥ ||99||

SHLOKA 100

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥१००॥

kumudaḥ kundaraḥ kundaḥ parjanyaḥ pāvano'nilaḥ |
amṛtāśo'mṛtavapuḥ sarvajñaḥ sarvatomukhaḥ ||100||

SHLOKA 101

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥१०१॥

sulabhaḥ suvrataḥ siddhaḥ śatrujicchatrutāpanaḥ |
nyagrodhodumbaro'śvatthaścāṇūrāndhraniṣūdanaḥ ||101||

SHLOKA 102

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥१०२॥

sahasrārciḥ saptajihvaḥ saptaidhāḥ saptavāhanaḥ |
amūrtiranagho'cintyo bhayakṛdbhayanāśanaḥ ||102||

SHLOKA 103

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥१०३॥

aṇurbṛhatkṛśaḥ sthūlo guṇabhṛnnirguṇo mahān |
adhṛtaḥ svadhṛtaḥ svāsyaḥ prāgvaṃśo vaṃśavardhanaḥ ||103||

SHLOKA 104

भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥१०४॥

bhārabhṛtkathito yogī yogīśaḥ sarvakāmadaḥ |
āśramaḥ śramaṇaḥ kṣāmaḥ suparṇo vāyuvāhanaḥ ||104||

SHLOKA 105

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमोऽयमः ॥१०५॥

dhanurdharo dhanurvedo daṇḍo damayitā damaḥ |
aparājitaḥ sarvasaho niyantā niyamo'yamaḥ ||105||

SHLOKA 106

सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥१०६॥

sattvavānsāttvikaḥ satyaḥ satyadharmaparāyaṇaḥ |
abhiprāyaḥ priyārho'rhaḥ priyakṛtprītivardhanaḥ ||106||

सूर्य, यज्ञ और आयुधधारी

SHLOKA 107

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥१०७॥

vihāyasagatirjyotiḥ surucirhutabhugvibhuḥ |
ravirvirocanaḥ sūryaḥ savitā ravilocanaḥ ||107||

SHLOKA 108

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥१०८॥

ananto hutabhugbhoktā sukhado naikajo'grajaḥ |
anirviṇṇaḥ sadāmarṣī lokādhiṣṭhānamadbhutaḥ ||108||

SHLOKA 109

सनात्सनातनतमः कपिलः कपिरप्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥१०९॥

sanātsanātanatamaḥ kapilaḥ kapirapyayaḥ |
svastidaḥ svastikṛtsvasti svastibhuksvastidakṣiṇaḥ ||109||

SHLOKA 110

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥११०॥

araudraḥ kuṇḍalī cakrī vikramyūrjitaśāsanaḥ |
śabdātigaḥ śabdasahaḥ śiśiraḥ śarvarīkaraḥ ||110||

SHLOKA 111

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥१११॥

akrūraḥ peśalo dakṣo dakṣiṇaḥ kṣamiṇāṃ varaḥ |
vidvattamo vītabhayaḥ puṇyaśravaṇakīrtanaḥ ||111||

SHLOKA 112

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥११२॥

uttāraṇo duṣkṛtihā puṇyo duḥsvapnanāśanaḥ |
vīrahā rakṣaṇaḥ santo jīvanaḥ paryavasthitaḥ ||112||

SHLOKA 113

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥११३॥

anantarūpo'nantaśrīrjitamanyurbhayāpahaḥ |
caturaśro gabhīrātmā vidiśo vyādiśo diśaḥ ||113||

SHLOKA 114

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥११४॥

anādirbhūrbhuvo lakṣmīḥ suvīro rucirāṅgadaḥ |
janano janajanmādirbhīmo bhīmaparākramaḥ ||114||

SHLOKA 115

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥११५॥

ādhāranilayo'dhātā puṣpahāsaḥ prajāgaraḥ |
ūrdhvagaḥ satpathācāraḥ prāṇadaḥ praṇavaḥ paṇaḥ ||115||

SHLOKA 116

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥११६॥

pramāṇaṃ prāṇanilayaḥ prāṇabhṛtprāṇajīvanaḥ |
tattvaṃ tattvavidekātmā janmamṛtyujarātigaḥ ||116||

SHLOKA 117

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥११७॥

bhūrbhuvaḥsvastarustāraḥ savitā prapitāmahaḥ |
yajño yajñapatiryajvā yajñāṅgo yajñavāhanaḥ ||117||

SHLOKA 118

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥११८॥

yajñabhṛdyajñakṛdyajñī yajñabhugyajñasādhanaḥ |
yajñāntakṛdyajñaguhyamannamannāda eva ca ||118||

SHLOKA 119

आत्मयोनिः स्वयञ्जातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥११९॥

ātmayoniḥ svayañjāto vaikhānaḥ sāmagāyanaḥ |
devakīnandanaḥ sraṣṭā kṣitīśaḥ pāpanāśanaḥ ||119||

SHLOKA 120

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ।
सर्वप्रहरणायुधो नमः ॥१२०॥

śaṅkhabhṛnnandakī cakrī śārṅgadhanvā gadādharaḥ |
rathāṅgapāṇirakṣobhyaḥ sarvapraharaṇāyudhaḥ |
sarvapraharaṇāyudho namaḥ ||120||

फलश्रुति: पाठ के बताए गए फल

SHLOKA 121

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥१२१॥

itīdaṃ kīrtanīyasya keśavasya mahātmanaḥ |
nāmnāṃ sahasraṃ divyānāmaśeṣeṇa prakīrtitam ||121||

SHLOKA 122

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥१२२॥

ya idaṃ śṛṇuyānnityaṃ yaścāpi parikīrtayet |
nāśubhaṃ prāpnuyātkiñcitso'mutreha ca mānavaḥ ||122||

SHLOKA 123

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥१२३॥

vedāntago brāhmaṇaḥ syātkṣatriyo vijayī bhavet |
vaiśyo dhanasamṛddhaḥ syācchūdraḥ sukhamavāpnuyāt ||123||

SHLOKA 124

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम् ॥१२४॥

dharmārthī prāpnuyāddharmamarthārthī cārthamāpnuyāt |
kāmānavāpnuyātkāmī prajārthī cāpnuyātprajām ||124||

SHLOKA 125

भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥१२५॥

bhaktimānyaḥ sadotthāya śucistadgatamānasaḥ |
sahasraṃ vāsudevasya nāmnāmetatprakīrtayet ||125||

SHLOKA 126

यशः प्राप्नोति विपुलं याति प्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥१२६॥

yaśaḥ prāpnoti vipulaṃ yāti prādhānyameva ca |
acalāṃ śriyamāpnoti śreyaḥ prāpnotyanuttamam ||126||

SHLOKA 127

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥१२७॥

na bhayaṃ kvacidāpnoti vīryaṃ tejaśca vindati |
bhavatyarogo dyutimānbalarūpaguṇānvitaḥ ||127||

SHLOKA 128

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥१२८॥

rogārto mucyate rogādbaddho mucyeta bandhanāt |
bhayānmucyeta bhītastu mucyetāpanna āpadaḥ ||128||

SHLOKA 129

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥१२९॥

durgāṇyatitaratyāśu puruṣaḥ puruṣottamam |
stuvannāmasahasreṇa nityaṃ bhaktisamanvitaḥ ||129||

SHLOKA 130

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥१३०॥

vāsudevāśrayo martyo vāsudevaparāyaṇaḥ |
sarvapāpaviśuddhātmā yāti brahma sanātanam ||130||

SHLOKA 131

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥१३१॥

na vāsudevabhaktānāmaśubhaṃ vidyate kvacit |
janmamṛtyujarāvyādhibhayaṃ naivopajāyate ||131||

SHLOKA 132

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥१३२॥

imaṃ stavamadhīyānaḥ śraddhābhaktisamanvitaḥ |
yujyetātmasukhakṣāntiśrīdhṛtismṛtikīrtibhiḥ ||132||

SHLOKA 133

नक्रोधो न च मात्सर्यं नलोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमम् ॥१३३॥

nakrodho na ca mātsaryaṃ nalobho nāśubhā matiḥ |
bhavanti kṛtapuṇyānāṃ bhaktānāṃ puruṣottamam ||133||

वासुदेव की महिमा और समापन

SHLOKA 134

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥१३४॥

dyauḥ sacandrārkanakṣatrā khaṃ diśo bhūrmahodadhiḥ |
vāsudevasya vīryeṇa vidhṛtāni mahātmanaḥ ||134||

SHLOKA 135

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥१३५॥

sasurāsuragandharvaṃ sayakṣoragarākṣasam |
jagadvaśe vartatedaṃ kṛṣṇasya sacarācaram ||135||

SHLOKA 136

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥१३६॥

indriyāṇi mano buddhiḥ sattvaṃ tejo balaṃ dhṛtiḥ |
vāsudevātmakānyāhuḥ kṣetraṃ kṣetrajña eva ca ||136||

SHLOKA 137

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥१३७॥

sarvāgamānāmācāraḥ prathamaṃ parikalpate |
ācāraprabhavo dharmo dharmasya prabhuracyutaḥ ||137||

SHLOKA 138

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥१३८॥

ṛṣayaḥ pitaro devā mahābhūtāni dhātavaḥ |
jaṅgamājaṅgamaṃ cedaṃ jagannārāyaṇodbhavam ||138||

SHLOKA 139

योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादिकर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥१३९॥

yogo jñānaṃ tathā sāṅkhyaṃ vidyāḥ śilpādikarma ca |
vedāḥ śāstrāṇi vijñānametatsarvaṃ janārdanāt ||139||

SHLOKA 140

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥१४०॥

eko viṣṇurmahadbhūtaṃ pṛthagbhūtānyanekaśaḥ |
trīṁllokānvyāpya bhūtātmā bhuṅkte viśvabhugavyayaḥ ||140||

SHLOKA 141

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥१४१॥

imaṃ stavaṃ bhagavato viṣṇorvyāsena kīrtitam |
paṭhedya icchetpuruṣaḥ śreyaḥ prāptuṃ sukhāni ca ||141||

SHLOKA 142

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥१४२॥

viśveśvaramajaṃ devaṃ jagataḥ prabhavāpyayam |
bhajanti ye puṣkarākṣaṃ na te yānti parābhavam ||142||

COLOPHON

इति श्रीमहाभारते आनुशासनिके भीष्मयुधिष्ठिरसंवादे विष्णोर्दिव्यसहस्रनामस्तोत्रं नाम एकोनपञ्चाशदधिकशततमोऽध्यायः ॥

iti śrīmahābhārate ānuśāsanike bhīṣmayudhiṣṭhirasaṃvāde viṣṇordivyasahasranāmastotraṃ nāma ekonapañcāśadadhikaśatatamo'dhyāyaḥ ||